श्री नारायणपंडिताचार्य विरचित

# ॥ कृष्णमाला ॥

अस्य श्रीकृष्णमालास्तोत्रस्य श्री नारायण पंडिताचार्य ऋषिः । शच्यभिमन्यमानत्रिष्टुप् छंदः । मध्वार्चितः श्रीरुक्मिणीसत्यभापतिः रूप्यपीठपतिः श्री कृष्णपरमात्मा देवता । श्री कृष्णनिर्मलभ्क्तिप्रसादसिद्ध्यर्थ कृष्णमालापठनाख्यं कर्म करिष्ये ।

कृष्णाय वासुदेवाय देवकीनंदनाय च ।
नंदगोपकुमाराय गोविंदाय नमो नमः ॥

वृंदारकैर्वंदित आविरासीद्भोजेंद्रपुत्र्यां भगवान् मुकुंदः ।
स वासुदेवो वसुदेवनीतो व्रजं तदाऽनीयत तेन दुर्गा ॥ १ ॥

कंसे यशोदासुतया विषण्णे भूम्ना हतायामपि पूतनायाम् ।
दत्वा करं नंदति तत्र नंदे चिक्षेप देवः शकटाक्षदैत्यम् ॥ २ ॥

स रौहिणेयेन निजाग्रजेन शेषेण पूर्वं शिशुवद् विरेजे ।
मात्रे स्ववक्त्रे प्रकटीचकार विश्वं तृणावर्तमपि न्यगृह्णात् ॥ ३ ॥

गर्गस्तुतो मृद्भुगशेषदर्शी मात्रा निबद्धोऽर्जुनभंजनोऽळम् ।
वृकैस्तु व्रिदावनगः सरामः स वत्सपाळो भुवनोत्सवोऽभूत् ॥ ४ ॥

वत्सासुरारिर्बकभित् सुगोपो गोगोपलक्ष्मीकटुकाळियधृक् ।
पीत्वा दवं चोग्रसुरार्यगारिः सप्तोक्षदैत्यच्छिदवाप जायाम् ॥ ५ ॥

(हत्वा खरं दैत्यमथ प्रळंबं बळेन पीत्वा च पुनर्दवाग्निम् ।)
विप्राभिराप्तो गिरिगुप्तगोपो गोविंद इंद्रार्चित एक्षि गोपैः ॥ ६ ॥

कात्यायिनीभक्तिमतीश्च कन्या उवाह रेमेऽखिळगोपिकाभिः ।
अगाच्च ताभ्यो द्शलक्षपुत्रान् स शंखचूडारिररिष्टमास्यत् ॥ ७ ॥

नंदाविताऽहेर्वरूणस्य पाशाद् वैकुंठदर्शी पशुजीवनेभ्यः ।

केश्यर्वहा व्योमसुरारिहारी कंसाघमक्रूरगिराऽशृणोत् सः ॥ ८ ॥

साक्रूररामो मधुरां स गच्छन्नक्रूरदृष्टौ यमुनाजले च ।
अवैक्षि पौरैर्धृतधौतवासा अलक्तकाक्तोऽमलमालभारी ॥ ९ ॥

सत्सुंदरश्चंदनचर्चितांगः चापं च चित्तं च चकर्ष कांसम् ।
सहस्तिनं हस्तिपतिं च हत्वा चाणूरहा मुष्टिकवैरिणाऽभात् ॥ १० ॥

बळोऽथ कंसावरजान् जघान बळानुजः कंसबळं च कंसम् ।
प्रसाद्य मातापितरौ नृपं च चक्रे विशोकस्य पिता सरामः ॥ ११ ॥

द्विजत्वमाप्तोऽथ विमुच्य नंदं सुतं मृतं प्राग् गुरवे ददौ सः ।
जरासुतं द्वाररुधं सरामो जिगाय चाष्टादशयुत्सु चेशः ॥ १२ ॥

पार्थानथाक्रूरमयापयत् स भीमाद्यवाप्तो व्रजमुद्धवं च ।
गोमंतगो रामयुतः किरीटी जरासुतं प्रास्य सृगालहाऽभूत् ॥ १३ ॥

दुर्मंत्रभूपैर्यतोऽभिषिक्तः कृष्णो विदर्भेऽकृत विश्वरूपम् ।
कृत्वा पुरीं यावनमीरितं तैः स घातयित्वाशु नृपानजैषीत् ॥ १४ ॥

स रेवतीकांतयुतो जितारिः भैष्मीमवाप्याकृत शंबरारिम् ।
स्यमंतकं जांबवतीं च लब्ध्वा सत्यां च लेभेऽजनयच्च सांबम् ॥ १५ ॥

विचक्रहा भूतनुदस्तरक्षाः बलेन साल्वार्दनसात्यकेन ।
युतः स हंसं डिभकं च हत्वा गदाग्रजोऽभाद् दयितत्रिशुक्लः ॥ १६ ॥

पार्थश्रिये हार्दिकमुक् कुरूंश्च गत्वाऽप्तभार्यान् द्विरवाप पार्थान् ।
अथाभिषिच्येंद्रपुरे निधाय पार्थान् स सत्याजनकघ्नमास्यत् ॥ १७ ॥

प्रदर्श्य रत्नं हलिनेऽर्कपुत्रीमुवाह नीलामपि स द्विरूपाम् ।
स मित्रविंदामथ कैकयीं च भद्रां तु माद्रीमपि लक्षणाख्याम् ॥ १८ ॥

तं नारदोऽथाखिलराजमध्ये प्रोचे त्वमाश्चर्यतमोऽसि धन्यः ।
कुंत्यार्थितः पार्थकुरूनजैषीदित्थं मुरादीन् नरकं च सोऽहन् ॥ १९ ॥

सत्यार्थमीशो हतपारिजातो देवौघजिद् द्व्यष्टसहस्त्रभार्यः ।
प्रत्येकमेतासु दशाप पुत्रान् सुतौ विजिष्णू अपि सोऽभ्यनंदत् ॥ २० ॥

स नारदावेक्षितविश्वरूपः पुरे सुभद्रां विजयाय चादात् ।
ददौ सरामो बहु रत्नमस्मै ददाह पार्थेन च खांडवं सः ॥ २१ ॥

समंतपूर्वं खलु पंचकं च गतो व्यधत्ताह्निकमश्वमेधम् ।
(पुरं व्रजन् मार्गरुधं निरास स दंतवक्रं च विडूरथं च ।)
संशिक्ष्य जिष्णुं स जरासुतारिं भीमं समाश्रिलष्य जघान चैद्यम् ॥ २२ ॥

निहत्य सौभेशमवेक्ष्य पार्थान् वने शिवाची खलमोहनाय ।
स पौंड्रकं निर्जितवान् जघान तथैकलव्यं च सुदक्षिणं च ॥ २३ ॥

भैष्म्यां व्यधात् प्रेमकलेर्विडंबं रामं व्रजं यांतमथात्मवाक्यात् ।
मैंदं च हत्वा विविदघ्नमाजौ कृष्णोऽभ्यनंदत् कुरूभीषणं च ॥ २४ ॥

अग्नयादिजिद् बाणजयी प्रभासे स प्राप पार्थान् कुरुराष् ट्रगांश्च ।
विवाह्य सौभद्रमुदारमंत्रो व्रतः स्वपुर्यां विजयेन सौत्ये ।
सुमंत्रकृत् पांडवसौत्यकारी स विश्वरूपोऽर्जुनशिक्षकोऽभात् ॥ २५ ॥

स्वानंदनं मंदमनोहासं शृंगारिणं शार्ंगिणमीक्षनाभ्याम् ।
मुष्णंतमायूंषि तमीक्षमाणा यौधागतिं योगजितामवापुः ॥ २६ ॥

भीष्मप्रतिज्ञामपीपलत् स भीष्मोक्तभूमा हृतवैष्णवास्त्रः ।
स्वप्रेऽर्जुनानुग्रहकृत् सुभद्राशोकच्छिदीशः स्वनयन् स्वशंखम् ॥ २७ ॥

शैनेयपो वासविना जघान जयद्रथं नीतिनिवारितास्त्रः ।
द्रौणीषुबद्धार्जुनवीर्यकारी राजेंद्रसून्वो स विरोधमास्यत् ॥ २८ ॥

अपात् स पार्थ रथमानमय्य भीमं च तुष्टाव निनिंद दुष्टम् ।
द्रौणिं च शप्त्वाऽंबिकदोषदर्शी कृष्णां प्रसाद्याभिषिषेच धर्मम् ॥ २९ ॥

स्वयं च भीष्मेण च शिक्षयित्वा भूपं स भीमेन कलिं निबध्य ।
जिष्णोर्गुरुः कारूणिकोऽप्युदंके गत्वा पुरीं स्वेभ्य उवाच वृत्तम् ॥ ३० ॥

व्रजन्नुदंकेष्टकृदेष पार्थान् परीक्षिते जेवनदोऽगवादी ।
अयाजयद् धर्मजमश्वमेधैरूचे च धर्मानयजत् स्वयं च ॥ ३१ ॥

सुरार्चितः शिक्षक उद्धवस्य स्वं ब्रह्मशापच्छलतः कुलं च ।
संहृत्य कृष्णो निजचित्त पद्मे देदीप्यते देव उत स्वलोके ॥ ३२ ॥

उद्धृत्य शास्त्रांबुनिधेर्निबद्धामभीष्टदात्रीमिव रत्नमालाम् ।
नारायणस्यार्पयते पदाब्जे नारायणः श्रीमति कृष्णमालाम् ॥ ३३ ॥

कृष्णाय वासुदेवाय देवकीनंदनाय च ।
नंदगोपकुमाराय गोविंदाय नमो नमः ॥

॥ इति श्रीनारायणपंडिताचार्यविरचिता श्रीकृष्णमाला ॥

॥ कृष्णार्पणमस्तु ॥